॥ ॐ गणसहस्रनामप्रारम्भः ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वै.श्रीरामसहस्र० ॥
नाम० ०००००० ॥

श्रीगणेशाय नमः ॥ श्रीरामचन्द्राय नमः ॥ श्रीमते रामानुजाय नमः ॥ कैलासशिखरा-
सीनौ पार्वतीपरमेश्वरौ ॥ अन्योन्यालिंगितौ हृष्टौ लोकरक्षार्थतत्परौ ॥ १ ॥
इन्द्रादिलोकपालैश्च सेवितौ च परस्परम् ॥ पार्वती परिपप्रच्छ तं नत्वा धर्मा-
नुत्तमान् ॥ २ ॥ पार्वत्युवाच ॥ भगवन् जगतां नाथ सर्वज्ञ जगदीश्वर ॥
त्वत्प्रसादान्मया ज्ञातं धर्मशास्त्रमनुत्तमम् ॥ ३ ॥ प्रायश्चित्तं तु पापानां श्रु-
तं सर्वमशेषतः ॥ ब्रह्महत्यादिपापानां निष्कृतिं च कुमेसि ॥ ४ ॥ श्रीमहा-
॥ १ ॥ देव उवाच ॥ नाम्नां श्रीपरमेश्वरस्य विमलं राकेशपूर्णा यथा ॥ न तत्त्वेन च ॥ १ ॥
कर्म धर्म सकलं ज्ञानं च योगादयः ॥ एतेषां च फलं विरागममलं रामस्य ना-
मप्रभो ॥ रूपान्नैव विभेदतस्य चरतो सन्तोषमितापापहो ॥ ५ ॥ रामं सान्द्र-
घनस्वरूपममलं स[illegible]च्चिदानन्दकं विभुदीप्त[illegible]सपीतवपुषं श्री-
वामवत्सःस्थलम् ॥ मञ्जीरांगदहारकंकणवरो[illegible]ज्वालसत्कुण्डलं कौस्तु-
भहारकिरीटकुण्डलधनुःसंचित्रबाणोज्वलम् ॥ ६ ॥ कामसौन्दर्य[illegible]
[illegible] स्वर्णं [illegible]तनुस्वतानी सीता समेतं ॥ तन्मूलोपरि पञ्चवर्णसमयं
[illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

…यं जलरूप… ॥
…नाम०००…

श्रीरामराम …श्रयराम

श्रीरामराम देवाश्रयरामरा ॥ श्रीरामराम कमलाश्रयरामराम श्रीरामराम वि
श्वाश्रयरामराम ॥१५॥ श्रीरामराम कर्माश्रयरामराम । श्रीरामराम योगाश्रय
रामराम । श्रीरामराम ज्ञानाश्रयरामराम श्रीरामराम भक्त्याश्रयरामराम श्रीरा
मराम । अक्षराश्रयरामराम । श्रीरामराम उद्भवाश्रयरामराम । श्रीरामराम विद्याश्र
यरामराम श्रीरामराम भक्ताश्रयरामराम ॥१७॥ श्रीरामराम मायाश्रयरामराम ॥ श्रीरामराम जीवाश्रयरामराम ५
श्रीरामराम मुक्ताश्रयरामराम श्रीरामराम अक्षराश्रयरामराम ॥१८॥ श्रीराम
॥२॥ राम ध्यानाश्रयरामराम ॥ श्रीरामराम प्रेमाश्रयरामराम श्रीरामराम …श्रय
रामराम । श्रीरामराम सर्वाश्रयरामराम ॥१९॥ श्रीरामराम अ…श्रयरामरा ॥२॥
म । श्रीरामराम धर्मास्पदरामराम ॥ श्रीरामराम कामास्पदरामराम । श्रीराम
राम मोक्षास्पदरामराम ॥२०॥ श्रीरामराम अन्तर्वेदरामराम । श्रीरामराम अ
न्तर्हितराम ॥ श्रीरामराम सर्वान्तकरामराम ॥ श्रीरामराम बाह्यान्तररामराम
राम ॥२१॥ श्रीराम भवव्यापकरामराम । श्रीरामराम जनजापकरामराम । श्री
रामराम जनपालकरामराम ॥ श्रीरामराम खलनाशकरामराम ॥२२॥ श्रीरामराम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रीरामराम मूलाश्रयराम

ध्याये चन्द्रमुखं द्विभं चापयुतं साकेतरत्नासने ...नवसंघशुभं सखीगणावृतं नित्यं निकुंजे स्थितं

नाशाय मुक्ताफलं मम् ७ ॐ नमोनमः श्रीरामराम रघुनन्दनरामराम श्री रामराम दुःखमर्द्दनरामराम श्रीरामराम नृपनन्दनरामराम श्रीरामराम प्रियनन्दनरामराम ८ श्रीरामराम भरताग्रजरामराम श्रीरामराम चित्तधामजमनोज्ञरामराम श्रीरामराम सद्विग्रहरामराम श्रीरामराम चिद्विग्रहरामराम श्रीरामराम घनआनन्दरामराम श्रीरामराम सदानन्दरामराम श्रीरामराम तनुभूषकराम श्रीरामराम रघुदूषणरामराम श्रीरामराम तनुनिर्गुणरामराम श्रीरामराम गुणनिर्गुणरामराम ११ श्रीरामराम रूपनिर्गुणरामराम श्रीरामराम महनिर्गुणरामराम श्रीरामराम सत्यवररामराम श्रीरामराम सत्यधररामराम १२ श्रीरामराम सत्यभररामराम श्रीरामराम सत्यरूपरामराम श्रीरामराम परमेश्वररामराम श्रीरामराम सर्वेश्वररामराम श्रीरामराम सर्वोत्तररामराम श्रीरामराम सर्वोपररामराम १५ श्रीरामराम ... अपररामराम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सर्वामृतरामराम ३० श्रीरामराम भुवभूषणरामराम श्रीरामराम
नृपभूषणरामराम श्रीरामराम जनभूषणरामराम श्रीरामराम
भवभूषणरामराम ३१ श्रीरामराम भद्रावनरामराम श्रीरामराम
कल्याणपनरामराम श्रीरामराम सुषमायनरामराम श्रीरामराम स-
जीभुजनरामराम ३२ श्रीरामराम सुरमर्दनरामराम श्रीरामराम नृपम-
र्दनरामराम श्रीरामराम भवखण्डनरामराम श्रीरामराम भूमण्ड-
नरामराम ३३ श्रीरामराम सुरमंगलरामराम श्रीरामराम मुनि-
मंगलरामराम श्रीरामराम गुणमंगलरामराम श्रीरामराम भवभंग-
नरामराम ३४ श्रीरामराम सुररंजनरामराम श्रीरामराम जनरंजन-
रामराम श्रीरामराम मुनिरंजनरामराम श्रीरामराम भवभंजनराम-
राम ३५ श्रीरामराम सत्यकररामराम श्रीरामराम धामाकररामराम
श्रीरामराम करुणाकररामराम श्रीरामराम शोभाकररामराम ३६

3

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दुरितान्तकरामराम ॥ श्रीरामराम नरकान्तकरामराम ॥ श्रीरामराम दनुजान्तकरा
मराम ॥ श्रीरामकालान्तकरामराम ॥ २३ ॥ श्रीरामराम दीनोद्धररामराम ॥ श्रीराम
राम ॥ धर्मोद्धररामराम श्रीरामराम वेदोद्धररामराम ॥ श्रीरामराम लोकोद्धररामराम ॥
२४ ॥ श्रीरामराम विश्वंकररामराम श्रीरामराम विश्वंभररामराम श्री
रामराम विश्वेश्वररामराम ॥ श्रीरामराम विश्व[illegible]ररामराम ॥ २५ ॥ श्रीरामरा
म भवतारकरामराम ॥ श्रीरामराम [illegible] ॥ श्रीरामराम शुभ
कारकरामराम श्रीरामराम भवतारकरामराम ॥ २६ ॥ श्रीरामराम त्रैलोग्य
जरामराम ॥ श्रीरामराम उद्भूग्जयरामराम ॥ श्रीरामराम विश्वंजयरामराम
श्रीरामराम सर्वेश्वररामराम श्रीरामराम अलोपररामराम ॥ श्रीरामराम अतिदुर्गम
रामराम ॥ श्रीरामराम अति सोगम रामराम ॥ २८ ॥ श्रीरामराम रूपानन्तराम
राम श्रीरामराम नामानन्तरामराम ॥ श्रीरामराम लीलानन्तरामराम श्री
रामराम धामानन्तरामराम ॥ २९ ॥ श्रीरामराम सगुणानन्तरामराम श्री
रामराम हरिनामानन्तरामराम ॥ श्रीरामराम निर्गुणानन्तराम ॥ श्रीरामराम

रा० ८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उश्चैव देवेन्द्रो देवतास्तथा ॥ आदित्यादिग्रहाश्चैव त्वमेव रघुनन्दन ॥६९॥ तो
पसाः ऋषयः सिद्धाः साध्याश्च मरुतस्तथा ॥ विप्रा वेदास्तथा यज्ञाः पुरा
णं धर्मसंहिताः ॥ वर्णाश्रमास्तथा धर्मा वर्णधर्मास्तथैव च ॥ यक्षराक्ष
सगंधर्वा दिक्पाला दिग्गजादयः ॥७०॥ सनकादिमुनिश्रेष्ठास्त्वमेव र
घुपुंगव ॥ वसवोऽष्टौ त्रयः काला रुद्रा एकादश स्मृताः ॥७१॥ तारको
दशदिक् चैव त्वमेव रघुनन्दन ॥ सप्तद्वीपाः समुद्राश्च नगा नद्यस्तथा द्रु
माः ॥७२॥ स्थावरा जङ्गमाश्चैव त्वमेव रघुनायक ॥ देवतिर्यङ्मनुष्या
णां दानवानां तथैव च ॥७३॥ माता पिता तथा भ्राता त्वमेव रघुवल्लभ
सर्वेषां त्वं परं ब्रह्म त्वन्मयं सर्वमेव हि ॥७४॥ त्वमक्षरं परं ज्योतिस्त्वमे
व पुरुषोत्तम ॥ त्वमेव तारकं त्वत्तोऽन्यन्नेव किंचन ॥७५॥ शान्तं सर्व

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नाथं हरिं चिदानन्दमयं मुकुन्दम् ॥ अशेषविद्याधिपतिं कवीन्द्रं नमा
मि रामं तमसः परस्तात् ॥ ६३ ॥ योगीन्द्रसंघैः शतसेव्यमानं नारायणं
निर्मलमादिदेवम् ॥ नतोऽस्मि नित्यं जगदेकनाथं आदित्यवर्णं तन
मसः परस्तात् ॥ ६४ ॥ विभूतिदं विश्वसृजं विराजं राजेन्द्रमीशं रघुवं
शनाथं ॥ अचिन्त्यमव्यक्तमनन्तमूर्तिं ज्योतिर्मयं राममहं भजामि
॥ ६५ ॥ अशेषसंसारविकारहीनं आद्यन्तसंपूर्णसुखाभिरामम् ॥
समस्तसाक्षी तमसः परस्तात् नारायणं विष्णुमहं भजामि ॥ ६६ ॥ मु
नीन्द्रगुह्यं परिपूर्णमेकं कलानिधिं कल्मषनाशहेतुम् ॥ परात्प
रं मत्परमं पवित्रं नमामि रामं महतो महान्तम् ॥ ६७ ॥ ब्रह्मा विष्णुश्च

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भक्तिः सततं ममास्तु ॥८३॥ इदं प्रियं नाथ वरं प्रयच्छ पुनः पुनस्त्वामिदम
मेव याचे ॥ श्रीवेदव्यास उवाच ॥ इत्येवमीडितो रामः प्रादात्तस्मै व
रान्तरम् ॥८४॥ विरराम महातेजाः सच्चिदानन्दविग्रहः ॥ अद्वैतमम
लं ज्ञानं स्वनाम स्मरणं तथा ॥८५॥ अन्तर्दधे जगन्नाथः पुरतस्त
स्य राघवः ॥ इति श्रीरघुनाथस्य स्तवराजमनुत्तमम् ॥८६॥ सर्वसौभा
ग्यसंपत्तिदायकं मुक्तिदं शुभम् ॥ कथितं ब्रह्मपुत्रेण वेदानां सारमु
त्तमम् ॥८७॥ गुह्याद्गुह्यतमं दिव्यं तव स्नेहात्प्रकीर्तितम् ॥ यः पठेच्छृ
णुयाद्वापि त्रिसंध्यं श्रद्धयान्वितः ॥८८॥ ब्रह्महत्यादिपापानि तत्स
मानि बहूनि च ॥ स्वर्णस्तेयी सुरापायी गुरुतल्पायुतानि च ॥८९॥
गोवधाद्युपपापानि अनृतात्संभवानि च ॥ सर्वैः प्रमुच्यते पापैः क

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गतं सूक्ष्मं परं ब्रह्म सनातनम्‌ ॥ राजीवलोचनं रामं प्रणमामि जगत्पति
म् ॥ श्री वेदव्यास उवाच ॥ ततः प्रसन्नः श्रीरामो प्रोवाच मुनिपुङ्गवम्‌
तुष्टोऽस्मि मुनिशार्दूल वृणुष्व वरमुत्तमम्‌ ॥ ७७ ॥ श्री नारद उवाच ॥
यदि तुष्टोऽसि सर्वज्ञ श्रीराम करुणानिधे ॥ त्वन्मूर्तिदर्शनेनैव कृता
र्थोऽहं मुनीश्वर ॥ ७८ ॥ धन्योऽहं कृतकृत्योऽहं पुण्योऽहं पुरुषोत्तम ॥ अ
द्य मे सफलं जन्म जीवितं सफलं च मे ॥ ७९ ॥ अद्य मे सफलं ज्ञानं अद्य मे
सफलं तपः ॥ अद्य मे सफलं सर्वं त्वत्पादाम्भोजदर्शनात्‌ ॥ ८० ॥ अ
द्य मे सफलं सर्वं त्वन्नामस्मरणं तथा ॥ त्वत्पादाम्भोरुहद्वन्द्वसद्भक्तिं दे
हि राघव ॥ ८१ ॥ ततः परमसंप्रीतो रामः प्राह स नारदम्‌ ॥ श्रीराम उवाच ॥
मुनिवर्य महाभाग मुने त्विष्टं ददामि ते ॥ ८२ ॥ यत्त्वया चेप्सितं सर्वं मनसः
त्तद्भविष्यति ॥ श्री नारद उवाच ॥ वरं न याचे रघुनाथ युष्मत्पादाब्ज

मित्रपराशरादिमुनिभिः संस्तूयमानं प्रभुम् ॥९६॥ सकलगुणनिधानं योगि
भिः स्तूयमानं भुजविजितविमानं राक्षसेन्द्रादिमानं । महितनृपभयानं सी
तया शोभमानं स्मर हृदयविमानं ब्रह्मरामाभिधानम् ॥९७॥ रघुवर तव
मूर्तिर्मामके मानसाब्जे नरकगतिहरं ते नामधेयं मुखे मे ॥ अनिश
मतुलभक्त्या मस्तके त्वत्पदाब्जं भवजलनिधिमग्नं रक्ष मामार्तबन्धो
॥९८॥ रामरत्नमहं वन्दे चित्रकूटपतिं हरिम् ॥ कौशल्याभक्तिसंभूतं जा
नकीकण्ठभूषणम् ॥९९॥ विमलकमलनेत्रं विस्फुरन्नीलगात्रं तप
नकुलपवित्रं दानवध्वान्तमित्रं भुवनकुलपवित्रं भूमिपुत्रीकलत्रं मलि
नगुणसमुद्रं श्रीरामचन्द्रं नमामि १०० ॥ इति श्रीसनत्कुमारसंहि
तायां नारदोक्तं श्रीरामस्तवराजस्तोत्रं संपूर्णं शुभमस्तु शुभं भूया
त् ॥ श्रीराम श्रीराम ॥ श्रीराम ॥ श्रीराम ॥ श्रीराम ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

॰पुत्रप्रतोभवेः॥ ६० ॥मानसंवाचिकंपापंकर्म्मणासमुपार्जितम्
श्रीरामस्मरणेनैवतत्क्षणान्नश्यतिध्रुवम्॥ ६१ ॥इदंसत्यमिदंसत्यंस पति
त्यमेतदिहोच्यते॥रामंसत्यंपरंब्रह्मरामात्किंचिन्नविद्यते॥ ६२ ॥न घम्
स्माद्रामस्यरूपोऽयंसत्यंसत्यमिदंजगत्॥श्रीरामचन्द्ररघुपुंगवराज
वर्य्यराजेन्द्ररामरघुनायकराघवेश॥ ६३ ॥राजाधिराजरघुनन्दनरा
मभद्रदासोऽहमद्यभवतःशरणागतोऽस्मि॥वैदेहीसहितंसुरद्रुम
तलेहैमेमहामंडपेमध्येपुष्पकमासनेमणिमयेवीरासनेसंस्थितं
६४॥अग्रेवाचयतिप्रभञ्जनसुतेतत्वंचमुनिभिःपरम्॥व्याख्यानं
भरतादिभिःपरिवृतंरामंभजेश्यामलम्॥ ६५ ॥रामंरत्नकिरीटकुंड
लयुतंकेयूरहारान्वितंसीतालंकृतवामभागममलंसिंहासनस्थं
विभुम्॥सुग्रीवादिहरीश्वरैःसुरगणैःसंसेव्यमानंसदाविश्वा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham